ANNUAL EXAMINATION

Question Paper 2023

NCERT BASED SYLLABUS

FOR CBSE AND STATE BOARD
FOLLOWING NCERT

aglasem.com

ANNUAL EXAMINATION (2022-23)

Class - VIII | **Subject – Sanskrit**
Time – 90 Minutes | **Maximum Marks- 40**

खण्ड 'क'

1. **अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत :–**

एकस्मिन् वने तीक्ष्णनखः नाम सिंहः प्रतिवसति स्म। क्षुधार्तः एकदा सः मृगयार्थं इतस्ततः परिभ्रमन् भृशं श्रान्तः जातः। सायंकाले यदा सः कस्यचित् पशोः एकां गुहां दृष्टवान् तदा सः प्रविश्य गुहायाम् उपाविशत् तत्र निलीय निषीदन् सिंहः अचिन्तयत् यत् अस्याः गुहायाः वास्तव्यः पशुः यदा अन्तः आयाति तदैव अहं तं आक्रम्य हनिष्यामि। इत्थं मम भोजनस्य व्यवस्था च भविष्यति।

(क) एकपदेन उत्तरत :– **(1/2x2=1)**

(i) एकस्मिन् वने कः प्रतिवसति स्म?

(ii) सः किमर्थं इतस्ततः परिभ्रमन्?

(ख) एकवाक्येन उत्तरत :– **(1x2=2)**

(i) सः सिंहः गुहां कदा दृष्टवान्?

(ii) सिंहः किम् अचिन्तयत्?

(ग) उचितं विकल्पं चिनुत :– **(1/2x2=1)**

(i) 'गुहां' अत्र का विभक्ति प्रयुक्ता?

(अ) प्रथमा (ब) द्वितीया (स) तृतीया (द) चतुर्थी

(ii) 'मारयिष्यामि' इति क्रियापदस्य कः अन्यः पर्यायः अत्र प्रयुक्तः?

(अ) भविष्यति (ब) प्रतिवसति (स) हनिष्यामि (द) आयाति

2. **अधोलिखितम् पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत :–**

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः।।

(क) एकपदेन उत्तरत :– **(1/2x2=1)**

(i) नगाधिराजः कः अस्ति?

(ii) नगाधिराजः कस्यां दिशि अस्ति?

(ख) एकवाक्येन उत्तरत :– **(1x2=2)**

(i) हिमालयः पृथिव्यां कीदृशः इव स्थितः अस्ति?

(ii) अत्र हिमालयः कस्य आत्मा अस्ति?

(ग) उचितं विकल्पं चिनुत :– **(1/2x2=1)**

(i) दिशि अत्र का विभक्ति प्रयुक्ता?

(अ) पंचमी (ब) षष्ठी (स) सप्तमी (द) संबोधन

(ii) 'पूर्वापरौ' अत्र किम् वचनम् प्रयुक्तम्?

(अ) एकवचनं (ब) द्विवचनं (स) बहुवचनं (द) न कोऽपि

schools.aglasem.com
aglasem.com

3. मञ्जूषात् क्रियापदानि चित्वा रिक्तपदानि पूरयत :– **(1/2x4=2)**

(मञ्जूषा – पिबेत्, प्रणमामि, वद, गायन्ति)

(क) प्रातः अहं पितरौ ————————।
(ख) प्रतिदिनं वस्त्रपूतं जलं ————।
(ग) देवाः गीतकानि ————————।
(घ) अनृतं मा ————————।

4. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरूत :– **(1x3=3)**

(क) हिमालयः उत्तरस्यां दिशि अस्ति।
(ख) श्रृङ्गाणि आतपवन्ति सन्ति।
(ग) अन्धकारः दिवाकरात् बिभेति।

5. अधोलिखितानां पदानां विलोमपदानि लिखत :– **(1/2x4=2)**

	पदानि		विलोम पदानि
(क)	यदा	=	————————
(ख)	दीर्घः	=	————————
(ग)	नवीनः	=	————————
(घ)	दूरम्	=	————————

6. मञ्जूषात् उचितपदं चित्वा रिक्तस्थानपूर्तिं कुरूत :– **(1/2x4=2)**

(मञ्जूषा – अतः, पुनः, तावत्, तर्हि)

(क) यदि परिश्रमेण पठसि ———————— उत्तीर्ण भविष्यसि।
(ख) त्वं ———————— मूषको भव।
(ग) यावत् त्वं न आगच्छसि ———————— अहं न गमिष्यामि।
(घ) छात्रः ज्वरपीडितः अस्ति ———————— सः गृहात् विद्यालयं न अगच्छत्।

7. अधोलिखित – वाक्यानां संस्कृते अनुवादं कुरूत :– **(1x2=2)**

(क) वह पढ़ने के लिए स्कूल जाती है।
(ख) बालिका खाकर सोती है।

8. परस्परं – मेलनं कुरूत :– **(1/2x4=2)**

	(क)	(ख)
(क)	रात्रिर्गमिष्यति	योजयते हिताय
(ख)	पापान्निवारयति	भविष्यति सुप्रभातम्
(ग)	अद्यैव मरणमस्तु	गुणान् प्रकटीकरोति
(घ)	गुह्यं निगूहति	युगान्तरे वा

schools.aglasem.com
aglasem.com

9. निम्नलिखितपदेषु धातूनां लकारं पुरूषं च लिखत :– **(1/2x4=2)**

	पदानि	लकारः	पुरूषः
(क)	ददाति	————	————
(ख)	प्रवदन्ति	————	————

10. निम्नलिखित – वाक्यानि लङ्लकारे परिवर्तयत :– **(1x2=2)**

(क) सः ग्रामे प्रतिवसति। = ——————————
(ख) अहं अध्यापकः भविष्यामि। = ——————————

11. अधोलिखितपदेषु धातुम् उपसर्गं च पृथक् कुरूत :– **(1/2x4=2)**

	पदानि	धातुः	उपसर्गं
(क)	प्रवदन्ति	————	————
(ख)	समाचरेत्	————	————

12. सन्धिविच्छेदं कुरूत :– **(1/2x4=2)**

(क) अद्यैव = —————— + ——————
(ख) युगान्तरे = —————— + ——————

13. घटनाक्रमानुसारेण वाक्यानि लिखत :– **(1/2x6=3)**

(क) एकदा तस्य प्रासादं एकः मुनिः आगच्छत्।
(ख) तां दृष्ट्वा राजा भृशं व्यलपत्।
(ग) पुरा कस्मिंचिद्देशे एकः नृपः प्रतिवसति स्म।
(घ) राज्ञः स्पर्शेण तस्य तनया स्वर्णप्रतिमा अभवत्।
(ङ) तस्य नाम यशपालः आसीत्।
(च) सः नृपाय वरम् अयच्छत् यत् तव स्पर्शेण सर्वं स्वर्णं भविष्यति।

14. वाक्यानि शुद्धानि कुरूत :– **(1/2x2=1)**

(क) लोभेन क्रोधः प्रभवति। = ——————
(ख) रामं रोचते ओदनम्। = ——————

15. धातुरूप प्रयोगं कुरूत :– **(1/2x2=1)**

(क) सः जलं ——————। (पा लृट्लकारे)
(ख) त्वं चलचित्रं ——————। (दृश् लङ्लकारे)

16. उपपद विभक्ति प्रयोगं कुरूत :– **(1/2x4=2)**

(क) श्री ———— नमः। (गणेश)
(ख) रामः —————— अलम्। (रावण)
(ग) सः —————— बिभेति। (शिक्षक)
(घ) त्वं ———— बहिः गच्छसि। (गृहं)

schools.aglasem.com
aglasem.com

17. शब्दरूपपरिचयं दीयताम् :— (1/2x4=2)

	विभक्तिः	वचनं
(क) पिता	————————	————————
(ख) राजानम्	————————	————————

18. धातुरूप परिचयं दीयताम् :— (1/2x4=2)

	लकारः	पुरूषः
(क) लभते	————————	————————
(ख) मोदिष्यसे	————————	————————

aglasem.com

schools.aglasem.com
AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com
aglasem.com